# Shri Ramarangidevacharyanirmitam Mumukshasarvasvam

# શ્રીરામરઙ્ગિદેવાચાર્યનિર્મિતં મુમુક્ષસર્વસ્વં

## Document Information

Text title : Shri Ramarangidevacharyanirmitam Mumukshasarvasvam

File name : mumukShasarvasvaMrAmarangidevAchArya.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : rAmaraNgidevAchArya

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

# શ્રીરામરઙ્ગિદેવાચાર્યનિર્મિતં મુમુક્ષસર્વસ્વં

કુર્વે મુમુક્ષુસર્વસ્વં નત્ત્વા ચ બ્રહ્મ રાઘવમ્ ।
ટીલાચાર્યં ચ શ્રીરામાનન્દાચાર્યં તથા ગુરુમ્ ॥ ૧॥

રક્ષતિ રક્ષિતો ધર્મો રક્ષણીયસ્તતશ્ચ સઃ ।
વક્ષ્યમાણગુણાનાં ચ રક્ષણાદ્ રક્ષ્યતે હિ સઃ ॥ ૨॥

મનસા કર્મણા વાચા હિંસા કાર્યાન કસ્યચિત્ ।
સત્યં હિતં પ્રિયં વાચ્યમહન્તાં મમતાં ત્યજેત્ ॥ ૩॥

ન્યાયાર્જિતધનેનેહ સન્તોષ્ટવ્યં ચ સર્વદા ।
પરદ્રવ્યસ્પૃહા નૈવ કર્ત્તવ્યા પુરુષેણ હિ ॥ ૪॥

પ્રસન્નચેતસા કાર્યં યજ્ઞોદાનં તપસ્તથા ।
અપ્રશસ્તં પરિત્યાજ્યં પ્રશસ્તં ચાચરેન્નરઃ ॥ ૫॥

ઉપકાર્યા જના નિત્યં નાપકાર્યાઃ કદાચન ।
અસૂયા નૈવ કર્ત્તવ્યા કસ્યચિત્ પુરુષસ્ય હિ ॥ ૬॥

જાત્યાશ્રયનિમિત્તૈશ્ચ દુષ્ટમન્નં હિ વર્જયેત્ ।
કુસઙ્ગતિં વિહાયેહ કુર્યાત્ સત્સઙ્ગતિં સદા ॥ ૭॥

અન્યધર્મમનાશ્રિત્ય સ્વધર્મે નિશ્ચલો ભવેત્ ।
અન્તર્બહિશ્ચ સંશુદ્ધઃ સર્વથા હિ ભવેન્નરઃ ॥ ૮॥

અસત્યં ન જનો બ્રૂયાચ્ચૌર્યં કાર્યં ન કર્હિચિત્ ।
વિરક્તસ્ય તુ ગાર્હસ્થ્યે પ્રાયશ્ચિત્તં ન વિદ્યતે ॥ ૯॥

દુઃખદે ચ મનુષ્યેઽપિ ક્રોધઃ કાર્યો ન કર્હિચિત્ ।
સર્વદા સર્વભૂતેષુ દયાં કુર્વન્તિ સાધવઃ ॥ ૧૦॥

અર્ચનીયૌ જગદ્ધેતૂ સીતારામૌ પરેશ્વરૌ ।
વન્દ્યૌ સુકીર્ત્તનીયૌ ચ ચિન્તનીયૌ હિ માનવૈઃ ॥ ૧૧॥

સ્વાચાર્યો વૈષ્ણવાશ્ચાત્ર સેવનીયાઃ પ્રયત્નતઃ ।
સુચિન્ત્યાઃ પઠનીયાશ્ચ પ્રબન્ધાઃ સામ્પ્રદાયિકાઃ ॥ ૧૨॥

સીતારામસ્તુતિઃ કાર્યા પ્રાતઃ સાયં વિશેષતઃ ।
વૃદ્ધાનાં વન્દનં કાર્યમાયુર્વિદ્યાયાશઃપ્રદમ્ ॥ ૧૩॥

કર્ત્તવ્યં જન્મસાફલ્યં શ્રીસીતારામભક્તિતઃ ।
વિશિષ્ટાદ્વૈતસિદ્ધાન્તો મન્તવ્યો વૈદિકઃ સદા ॥ ૧૪॥

ભક્ત્યૈવ લભ્યતે મુક્તિર્ભક્તિર્જ્ઞાનાત્ પ્રજાયતે ।
ચિદચિદીશતત્ત્વાનામાચાર્યાજ્જ્ઞાનમર્જયેત ॥ ૧૫॥

ચિદર્થસ્તત્ર જીવાત્મા જ્ઞાતા ચાણુર્મતો બુધૈઃ ।
જ્ઞાનેન ધર્મભૂતેન વ્યાપ્તઃ સોઽખિલવર્મણિ ॥ ૧૬॥

તત એવ સ પાદાદૌ વેત્તિ સર્વં સુખાદિકમ્ ।
જીવાત્મનો વિભુત્વે તુ ગત્યાગત્યોરસમ્ભવઃ ॥ ૧૭॥

મધ્યમપરિમાણત્વે ત્વનિત્યત્વં ઘટાદિવત્ ।
અકૃતાભ્યાગમશ્ચાથ કૃતનાશસ્તદા પુનઃ ॥ ૧૮॥

સુખિદુઃખિપ્રતીતિભ્યાં જીવા ભિન્ના મિથો મતાઃ ।
અણુત્વાદેવ ચાત્માનો બ્રહ્મભિન્ના મતા બુધૈઃ ॥ ૧૯॥

ઈશ્વરાધીનકર્ત્તારો જીવાત્માનઃ પ્રકીર્તિતાઃ ।
દેહેન્દ્રિયાદિતો ભિન્ના જીવા નિત્યા મતાસ્રિધા ॥ ૨૦॥

સ્વકર્મફલભોક્તારસ્તત્ર બદ્ધા હિ સમ્મતાઃ ।
છિન્નબન્ધાસ્તથા ભક્તયા મુક્તાઃ શ્રીરામકિઙ્કરાઃ ॥ ૨૧॥

સર્વદા કર્મભિર્મુક્તા નિત્યા હનુમદાદયઃ ।
બ્રહ્મદેહાઃ શ્રુતૌ જીવાસ્તેષાં હિ બ્રહ્મતા ન તત્ ॥ ૨૨॥

અચિદચેતનં તત્ત્વં ચતુર્ધાઽભિહિતં ચ તત્ ।
કાલઃ પ્રકૃતિતત્ત્વં ચ શુદ્ધસત્ત્વં તથા મતિઃ ॥ ૨૩॥

બ્રહ્મદેહો વિભુઃ કાલઃ સત્વાદિગુણવર્જિતઃ ।
કાલાધીનં જગત્ કાલઃ સર્વાધારો જડસ્તથા ॥ ૨૪॥

પ્રકૃતિર્જડતત્ત્વં હિ સત્ત્વાદિત્રિગુણાશ્રયઃ ।
નિત્યા ચાચ્છાદિકા સા હિ જીવબ્રહ્મસ્વરૂપયોઃ ॥ ૨૫॥

સામ્યે સ્વસ્ય ગુણાનાં સા સમવિકારકારિણી ।
વૈષમ્યે ત્વીશસઙ્કલ્પાદ્ વિષમસૃષ્ટિસર્જિકા ॥ ૨૬॥

મહાઁશ્ચ પ્રકૃતેરાદ્યો વિકારસ્ત્રિવિધઃ સ્મૃતઃ ।
અહઙ્કારાસ્ત્રયસ્તસ્ય વિકારાઃ સાત્ત્વિકાદયઃ ॥ ૨૭॥

સાત્ત્વિકાત્ ખલ્વહઙ્કારાજ્જાતાનિ ત્વિન્દ્રિયાણિ ચ ।
મતાનિ મન આદીનિ જ્ઞાનેન્દ્રિયાણિ તત્ર ષટ્ ॥ ૨૮॥

કર્મેન્દ્રિયાણિ વિદ્વદ્ભિર્વાગાદીનિ મતાનિ હિ ।
સહકારી મતશ્ચાથાહઙ્કારો રાજસઃ કિલ ॥ ૨૯॥

શબ્દતન્માત્રકં જાતમહઙ્કારાચ્ચ તામસાત્ ।
તતો વ્યોમ તતો જાતં તન્માત્રં સ્પર્શનામકમ્ ॥ ૩૦॥

સ્પર્શતન્માત્રતો જાતં ભૂતં હિ વાયુસંજ્ઞકમ્ ।
જાતં ચ વાયુભૂતાદ્ધિ તન્માત્રં રૂપસંજ્ઞકમ્ ॥ ૩૧॥

રૂપતન્માત્રતસ્તેજસ્તતસ્તન્માત્રકં રસઃ ।
રસાદાપસ્તતો ગન્ધસ્તસ્માદ્ ભૂમિરજાયત ॥ ૩૨॥

ભૂતગુણાશ્ચ શબ્દાદ્યા ઇન્દ્રિયવિષયા મતાઃ ।
તાન્ વિસૃજ્ય ગુરોઃ શક્તં ચરણં શરણં બ્રજેત્ ॥ ૩૩॥

શ્રીરામશરચાપાભ્યામઙ્કનં ભુજમૂલયોઃ ।
વિધેયસ્તાપસંસ્કારો ગુરુણા પાપનાશકઃ ॥ ૩૪॥

શ્રીરામપાદપદ્માભં શ્રીયુતં રામતોષકમ્ ।
કાર્યં દ્વાદશસઙ્ખ્યાકમૂર્ધ્વપુણ્ડ્રં હિ મુક્તિદમ્ ॥ ૩૫॥

રામદાસ્યપરં રમ્યં પવિત્રં ચાઘનાશકમ્ ।
શિષ્યસ્ય નામ કર્ત્તવ્યં ગુરુણા મુક્તિદાયકમ્ ॥ ૩૬॥

ગ્રીવાયાં ગુરુણા દત્તે મોક્ષાનન્દપ્રદાયિકે ।
તુલસીમાલિકે પુણ્યે ધારણીયે મુમુક્ષુણા ॥ ૩૭॥

સદ્રહસ્યદ્વયેનાથ રામમન્ત્રસ્ય દીક્ષયા ।
ગુરુઃ શિષ્યં પ્રપન્નં હિ તારયેદ્ ભવવારિધેઃ ॥ ૩૮॥

ભક્ત્યા કર્મવિનાશે હિ દેહં ત્યક્ત્વાऽર્ચિરાદિના ।

નિત્યધામનિ સમ્પ્રાપ્તે સાયુજ્યં લભ્યતે નરૈઃ ॥ ૩૯॥

શુદ્ધસત્વાશ્રયો દ્રવ્યં શુદ્ધસત્વં પ્રકીર્ત્તિતમ્ ।
નિત્યધામાદયઃ શબ્દાઃ પર્યાયાસ્તસ્ય સમ્મતાઃ ॥ ૪૦॥

તત્ પરાગજડં બોધ્યં ન કાલસ્તત્ર વૈ પ્રભુઃ ।
નિત્યમુક્તેશ્વરાદેસ્તદ્ ભોગ્યદેહાદિકં મતમ્ ॥ ૪૧॥

જ્ઞાનમર્થપ્રકાશસ્તદ્ ધર્મો જીવેશધર્મિણોઃ ।
પ્રભાવત્ સ્વપ્રકાશં ચ વિભુ નિત્યં પરાગથ ॥ ૪૨॥

ઈશ્વરસ્ત્વવતારી હિ સર્વેષાં ચ નિયામકઃ ।
સચ્ચિદાનન્દરૂપઃ સ નિત્યઃ સર્વશરીરકઃ ॥ ૪૩॥

વિભુશ્ચ દોષશૂન્યશ્ચ કલ્યાણગુણસાગરઃ ।
રામબ્રહ્માદિવાચ્યશ્ચ જગજ્જન્માદિકારણમ્ ॥ ૪૪॥

સર્વારાધ્યશ્ચ સર્વજ્ઞઃ સર્વશક્તિશ્ચ સર્વદઃ ।
ભક્ત્યા તથા પ્રપત્ત્યા ચ જીવાનાં મુક્તિદાયકઃ ॥ ૪૫॥

ઉપાદાનં નિમિત્તં ચ જગતો વેદવેદિતઃ ।
ભગવાનવ્યયઃ સાક્ષી વિભૂતિદ્વયનાયકઃ ॥ ૪૬॥

પરો વ્યૂહસ્તથાઽન્તઃસ્થો વિભવોઽર્ચાવતારકઃ ।
ઇતિ પઞ્ચવિધઃ પ્રોક્તઃ સીતાનાથઃ પરેશ્વરઃ ॥ ૪૭॥

વાસુદેવાદયો વ્યૂહા સાકેતસ્થઃ પરઃ સ્મૃતઃ ।
વ્યાપ્તોઽન્તસ્થશ્ચ સર્વાત્મા યોગિધ્યેયશ્ચ રાઘવઃ ॥ ૪૮॥

મત્સ્યકૂર્માદિરૂપશ્ચ વિભવો જાનકીપતિઃ ।
ભક્તેષ્ટમૂર્તિરૂપો હિ રામશ્ચાર્ચાઽવતારકઃ ॥ ૪૯॥

ભાગીરથ્યાશિષ્યશ્રીરામરઙ્ગિવિનિર્મિતમ્ ।
ભૂયાન્મુમુક્ષુસર્વસ્વં મુમુક્ષૂણાં હિતાવહમ્ ॥ ૫૦॥

ઇતિ શ્રીરામરઙ્ગિદેવાચાર્યનિર્મિતં મુમુક્ષસર્વસ્વં સમ્પૂર્ણમ્ ।

Encoded and proofread by Mrityunjay Pandey

*Shri Ramarangidevacharyanirmitam Mumukshasarvasvam*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*